# Shri Gaudapadacharya Ashtottarashata Namavali

# परमगुरु गौडपादाचार्याणां अष्टोत्तरशतनामावलिः

## Document Information

Text title : Gaudapadacharya Ashtottarashata Namavali 108 Names

File name : gauDapAdAchAryAShTottarashatanAmAvalI.itx

Category : deities_misc, gurudev, aShTottarashatanAmAvalI

Location : doc_deities_misc

Author : Swami Bodhatmananda Saraswati

Transliterated by : Upanishad Bliss upanishadbliss at gmail.com

Proofread by : Swami Bodhatmananda Saraswati soham.brahma at gmail.com

Description/comments : The nAmAvalI is based on Mandukya Karika

Acknowledge-Permission: Swami Bodhatmananda Saraswati, Chinmaya mission

Latest update : September 6, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2020

*sanskritdocuments.org*

# परमगुरु गौडपादाचार्याणां अष्टोत्तरशतनामावलिः

ॐ श्री परमगुरवे नमः ।
ॐ श्री गौडपादाचार्यवर्याय नमः ।
ॐ माण्डूक्योपनिषत्कारिकाकर्त्रे नमः ।
ॐ स्थानत्रयातीताय नमः ।
ॐ पादत्रयातीताय नमः ।
ॐ भोगत्रयातीताय नमः ।
ॐ अवस्थात्रयातीताय नमः ।
ॐ तृप्तित्रयातीताय नमः ।
ॐ प्रज्ञानन्दस्वरूपिणे नमः ।
ॐ पूज्याभिपूज्याय नमः ।
ॐ अस्पर्शयोगात्मने नमः ।
ॐ अमनीभावस्वरूपाय नमः ।
ॐ आत्मसत्यानुबोधाय नमः ।
ॐ प्रपञ्चोपशमाय नमः ।
ॐ शान्ताय नमः ।
ॐ शिवाय नमः ।
ॐ अद्वितीयाय नमः ।
ॐ चतुर्थाय नमः ।
ॐ तुरीयाय नमः ।
ॐ अन्यथाग्रहणाग्रहणविलक्षणाय नमः । २०
ॐ अभयरूपिणे नमः ।
ॐ परमार्थाय नमः ।
ॐ निर्विकल्पाय नमः ।
ॐ साक्षान्नारायणरूपभृते नमः ।
ॐ सकृज्ज्योतिस्वरूपाय नमः ।

ॐ अजमनिद्रमस्वप्नरूपाय नमः ।
ॐ ज्ञानालोकाय नमः ।
ॐ चलाचलनिकेतनाय नमः ।
ॐ परमयतये नमः ।
ॐ तत्त्वीभूताय नमः ।
ॐ तत्त्वारामाय नमः ।
ॐ तत्त्वादप्रच्युताय नमः ।
ॐ अकार्पण्यरूपाय नमः ।
ॐ अजायमानाय नमः ।
ॐ अमृतस्वरूपाय नमः ।
ॐ ज्ञातृज्ञेयज्ञानत्रिपुटीरहिताय नमः ।
ॐ धीराय नमः ।
ॐ हेतुफलात्मविवर्जिताय नमः ।
ॐ अनादिमायाविध्वंसिने नमः ।
ॐ ब्रह्मणे नमः । ४०
ॐ विदितोङ्काराय नमः ।
ॐ मुनये नमः ।
ॐ चतुष्पाद्विवर्जिताय नमः ।
ॐ वीतरागभयाय नमः ।
ॐ वेदपारगाय नमः ।
ॐ अदृश्यात्मने नमः ।
ॐ अव्यवहार्यात्मने नमः ।
ॐ अग्राह्यात्मने नमः ।
ॐ अलक्षणात्मने नमः ।
ॐ अचिन्त्यात्मने नमः ।
ॐ अव्यपदेशात्मने नमः ।
ॐ एकात्मप्रत्ययसाराय नमः ।
ॐ यादृच्छिकाय नमः ।
ॐ ग्राह्यग्राहकविनिर्मुक्ताय नमः ।
ॐ साम्यरूपाय नमः ।
ॐ सकृद्विभाताय नमः ।
ॐ चतुष्कोटिनिषेधाय नमः ।

ॐ भगवते नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ महाधीमते नमः । ६०
ॐ विशारदाय नमः ।
ॐ अलब्धावरणात्मने नमः ।
ॐ असङ्गात्मने नमः ।
ॐ निर्मलाय नमः ।
ॐ कार्यकारणविलक्षणाय नमः ।
ॐ जीवजगन्मिथ्यात्वज्ञात्रे नमः ।
ॐ स्वयम्प्रकाशस्वरूपिणे नमः ।
ॐ अनिर्वचनीयबोधाय नमः ।
ॐ सर्वाभिनिवेशवर्जिताय नमः ।
ॐ कामादिदोषरहिताय नमः ।
ॐ निर्वाणसन्दायिने नमः ।
ॐ निर्वाणात्मने नमः ।
ॐ सङ्कल्पविकल्परहिताय नमः ।
ॐ सुप्रशान्ताय नमः ।
ॐ अचलाय नमः ।
ॐ सर्वप्रत्ययवर्जिताय नमः ।
ॐ ग्रहोत्सर्गवर्जिताय नमः ।
ॐ अनिर्वचनीयसुखरूपाय नमः ।
ॐ अलातशान्त्यात्मने नमः ।
ॐ वाग्मिने नमः । ८०
ॐ सच्चिदानन्दविग्रहाय नमः ।
ॐ संशयविपर्ययरहिताय नमः ।
ॐ प्रणवस्वरूपाय नमः ।
ॐ अव्ययाय नमः ।
ॐ अपूर्वाय नमः ।
ॐ अनन्तराय नमः ।
ॐ अबाह्याय नमः ।
ॐ अनपराय नमः ।
ॐ आदिमध्यान्तवर्जिताय नमः ।

ॐ परमेश्वराय नमः ।
ॐ सर्वविदे नमः ।
ॐ तपस्विने नमः ।
ॐ प्रज्ञालोकाय नमः ।
ॐ अतिगम्भीराय नमः ।
ॐ समदर्शिने नमः ।
ॐ तायिने नमः ।
ॐ एषणात्रयनिर्मुक्ताय नमः ।
ॐ वेदान्तसाराय नमः ।
ॐ अमात्राय नमः ।
ॐ अनन्तमात्राय नमः । १००
ॐ स्वरूपावबोधाय नमः ।
ॐ सर्वसाक्षिणे नमः ।
ॐ अद्वैतज्ञानभास्कराय नमः ।
ॐ वेदान्तविभूत्यै नमः ।
ॐ सर्वलक्षणसम्पन्नाय नमः ।
ॐ परमतीर्थाय नमः ।
ॐ श्रुतिस्मृतिन्यायशलाकारूपिणे नमः ।
ॐ परमहंसाय नमः । १०८

इति स्वामी बोधात्मानन्दसरस्वतीविरचिता
गौडपादाचार्याष्टोत्तरशतनामावलिः समाप्ता ।

*Shri Gaudapadacharya Ashtottarashata Namavali*

pdf was typeset on September 10, 2020

Please send corrections to *sanskrit@cheerful.com*